# शांति पाठ (संस्कृत)
# Sānti pāṭha (Sanskṛta)

*(शांति-पाठ व विसर्जन-पाठ संस्कृत या हिंदी दोनों में से कोई भी एक पढ़ने चाहिए)*
*(शांति-पाठ बोलते समय दोनों हाथों से पुष्प-वृष्टि करते रहें)*
*(śānti-pāṭha va visarjana-pāṭha sanskṛta yā hindī dōnōṁ mēṁ sē kōi bhī ēka parhanē cāhi'yē)*
*(śānti-pāṭha bōlatē samaya dōnōṁ hāthōṁ sē puṣpa-vr̥ṣṭi karatē rahēṁ)*

शांतिजिनं शशि-निर्मल-वक्त्रं, शील-गुण-व्रत-संयमपात्रम् |
अष्टशतार्चित-लक्षण-गात्रं, नौमि जिनोत्तममंबुजनेत्रम् ||१||
Sāntijinaṁ śaśi-nirmala-vaktraṁ, śīla-guṇa-vrata-sanyamapātram |
Aṣṭaśatārcita-lakṣaṇa-gātraṁ, naumi jinōttamamambujanētram ||1||

पंचमभीप्सितचक्रधराणां, पूजितमिंद्रनरेन्द्रगणैश्च |
शांतिकरं गणशांतिमभीप्सु:, षोडशतीर्थंकरं प्रणमामि ||२||
Pañcamabhīpsitacakradharāṇāṁ, pūjitamindranarēndragaṇaiśca |
Śāntikaraṁ gaṇaśāntimabhīpsu:, Ṣōḍaśatīrthaṅkaraṁ praṇamāmi ||2||

दिव्यतरु: सुरपुष्प सुवृष्टिर्दुन्दुभिरासन योजनघोषौ |
आतप-वारण चामर-युग्मे यस्य विभाति च मंडल तेज: ||३||
Divyataru: Surapuṣpa suvr̥ṣṭirdundubhirāsana yōjanaghōṣau |
Ātapa-vārana cāmara-yugmē yasya vibhāti ca maṇḍala tēja: ||3||

तं जगदर्चित-शांति-जिनेन्द्रं शांतिकरं शिरसा प्रणमामि |
सर्वगणाय तु यच्छतु शांतिं मह्यमरं पठते परमां च ||४||
Taṁ jagadarcita-śānti-jinēndraṁ śāntikaraṁ śirasā praṇamāmi |
Sarvagaṇāya tu yacchatu śāntiṁ mahyamaraṁ paṭhatē paramāṁ ca ||4||

येऽभ्यर्चिता मुकुट-कुंडल-हार-रत्नै: शक्रादिभि: सुरगणै:स्तुत-पादपद्मा: |
ते मे जिना प्रवरवंश-जगत्प्रदीपा-स्तीर्थंकराः सतत-शांतिकरा: भवन्तु ||५||
Yēbhyarcitā mukuṭa-kuṇḍala-hāraratnai:
Śakrādibhi:Suragaṇai:Stuta-pādapadmā: |
Tē mē jinā pravaravanśa-jagatpradīpā-


All copyrights reserved ©

stīrthaṅkarāḥ satata-śāntikarā: Bhavantu ||5||

संपूजकानां प्रतिपालकानां, यतीन्द्र-सामान्य-तपोधनानाम् |
देशस्य राष्ट्रस्य पुरस्य राज्ञ:, करोतु शांतिं भगवान् जिनेन्द्र! ||६||
Sampūjakānāṁ pratipālakānāṁ, yatīndra-sāmān'ya-tapōdhanānām |
Dēśasya rāṣṭrasya purasya rājña:, Karōtu śāntiṁ bhagavān jinēndra! ||6||

क्षेमं सर्वप्रजानां, प्रभवतु बलवान् धार्मिको भूमिपाल: |
काले-काले च सम्यग्वर्षतु मघवा व्याधयो यांतु नाशम् ||
दुर्भिक्षं चौर-मारी, क्षणमपि जगतां मास्म भूज्जीवलोके |
जैनेन्द्रं धर्मचक्रं, प्रभवतु सततं सर्वसौख्यप्रदायि ||७||
Kṣēmaṁ sarvaprajānāṁ, prabhavatu balavān dhārmikō bhūmipāla: |
Kālē-kālē ca samyagvarṣatu maghavā vyādhayō yāntu nāśam ||
Durbhikṣaṁ caura-mārī, kṣaṇamapi jagatāṁ māsma bhūjjīvalōkē |
Jainēndraṁ dharmacakraṁ, prabhavatu satataṁ sarvasaukhyapradāyi ||7||

प्रध्वस्तघातिकर्माण:, केवलज्ञानभास्करा: |
कुर्वन्तु जगतां शांतिं, वृषभाद्या जिनेश्वरा: ||८||
Pradhvastaghātikarmāṇa:, Kēvalajñānabhāskarā: |
Kurvantu jagatāṁ śāntiṁ, vr̥ṣabhādyā jinēśvarā: ||8||

अथ इष्ट-प्रार्थना
Atha iṣṭa-prārthanā

प्रथमं करणं चरणं द्रव्यं नम:।
शास्त्राभ्यासो जिनपतिनुति:, संगति: सर्वदार्यै:|
सद्वृत्तानां गुणगणकथा, दोष-वादे च मौनम्||
सर्वस्यापि प्रिय-हित-वचो, भावना चात्मतत्त्वे|
सम्पद्यन्तां मम भवे-भवे, यावदेतेऽपवर्ग: ||९||
prathamaṁ karaṇaṁ caraṇaṁ dravyaṁ nama: |
Śāstrābhyāsō jinapatinuti:, Saṅgati: Sarvadāryaiḥ |
Sadvr̥ttānāṁ guṇagaṇakathā, dōṣa-vādē ca maunam ||
Sarvasyāpi priya-hita-vacō, bhāvanā cātmatattvē |
Sampadyantāṁ mama bhavē-bhavē, yāvadētēpavarga: ||9||


All copyrights reserved ©

तव पादौ मम हृदये, मम हृदयं तव पदद्वये लीनम् |
तिष्ठतु जिनेन्द्र! तावद्यावन्निर्वाण-सम्प्राप्ति ||१०||
Tava pādau mama hṛdayē, mama hṛdayaṁ tava padadvayē līnam |
Tiṣṭhatu jinēndra! Tāvadyāvannirvāṇa-samprāpti ||10||

अक्खर-पयत्थहीणं, मत्ता-हीणं च जं मए भणियं |
तं खमउ णाणदेव, य मज्झ वि दुक्खक्खयं दिंतु ||११||
Akkhara-payat'thahīṇaṁ, mattā-hīṇaṁ ca jaṁ ma'ē bhaṇiyaṁ |
Taṁ khama'u ṇāṇadēva, ya majjha vi dukkhakkhayaṁ dintu ||11||

दुक्खक्खओ कम्मक्खओ, समाहिमरणं च बोहिलाहो य |
मम होउ तिजगबांधव! तव जिणवर-चरण-सरणेण ||१२||
Dukkhakkha'ō kam'makkha'ō, samāhimaraṇaṁ ca bōhilāhō ya |
Mama hō'u tijagabāndhava! Tava jiṇavara-caraṇa-saraṇēṇa ||12||

* * * A * * *


All copyrights reserved ©

2Alotus